# सौन्दर्यलहरी

## राग–ताल–मालिका – संस्कृत – श्री आदि शंकरा

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो न खलु कुशलः स्पन्दितु – मपि ।
अतस्त्वा – माराध्यां हरि – हर – विरिंचादिभि–रपि
प्रणन्तुं स्तोतुं वा कथं – अकृतपुण्यः प्रभवति ॥ १॥

हरिस्त्वामाराध्या प्रणत – जन – सौभाग्य – जननीं
पुरा नारी भूत्वा पुररिपुमपि क्षोभ – मनयत् ।
स्मरो पि त्वां नत्वा रतिनयन – लेह्येन वपुषा
मुनीनामप्यन्तः प्रभवति हि मोहाय महताम् ॥ ५॥

धनुः पौष्प मौर्वी मधुकरमयी पंच विशिखाः
वसन्तः सामन्तो मलयमरु – दायोधन – रथः ।
तथाप्येकः सर्व हिमगिरिसुते कामपि कृपां
अपांगत्ते लब्ध्वा जगदिद – मनंगो विजयते ॥ ६॥

मृणाली–मृद्वीनां तव भुजलतानां चतसृणां
चतुर्भिः सौन्दर्यं सरसिजभवः स्तौति वदनैः ।
नखेभ्यः सन्त्रस्यन् प्रथम – मथना – दअन्तकरिपोः
चतुर्णा शीर्षाणां समं – अभयहस्तार्पण – धिया ॥ ७॥

नमस्ते भगवती नमस्ते

पदन्यास – क्रीडा – परिचयम – इवारब्धु – मनसः
स्खलन्तस्ते खेल भवनकलहंसा न जहति ।
अतस्तेषां शिक्षां सुमगमणि – मंज्जीर – रणित –
च्छलादाचक्षाणं चरणकमलं चारुचरिते ॥ ९१॥

अच्छक्षाणमिव भवति

प्रदीप – ज्वालाभि – र्दिवसकर – नीराजनविधिः
सुधासूते – चन्द्रोपल – जललवै – रर्घ्यरचना ।
स्वकीयैरम्भोपिः सलिल – निधि – सौहित्यकरणं तथा
त्वदीयाभि – र्वाग्भि – स्तव जननी वाचां स्तुतिरियम् ॥ १००॥